© 2015 IJSRSET | Volume 1 | Issue 2 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099

# वृत्तिस्वरुपविमर्शः

सांवरिया लाल शर्मणः
अनुसंधाता, राष्ट्रिय संस्कृत संस्थानम्, जयपुर परिसरः।

व्याकरणदर्शने शब्दो न ध्वनिरूपः, तस्य उच्चरितप्रध्वंसित्वेन समुदाया सम्भवात्। तथाहि 'घटः' इत्यत्र चत्वारो ध्वनयो, नादा वर्णा वा धकाराकारटकाराकाराः। ते च उच्चरितप्रध्वंसिन इति एको ध्वनिः उच्चरितः सन् यदा प्रध्वस्तो भवति तदा अन्यो ध्वनिरूच्चार्यते। तस्यापि प्रध्वंसोत्तरमन्य इत्येवं कमेण तेषां यौगपद्याभावात्, समुदायः कथं सम्भवेत् ततश्च घटादिरूपसमुदायासम्भवे अर्थबोधकता शक्तिरपि क्व तिष्ठेत्? तदुक्तं भाष्यकृता 'यावद् गकारे वाग्वर्तते न तावद् औकारे, यावच्च औकारे न तावद् विसर्गे इति एकेन यत्नेन यो वर्णः उच्चार्यते तेनैव विच्छिन्ने तस्मिन् उपसंहृत्य तं यत्न यत्नान्तरमुपादाय वर्णान्तरमुच्चार्यते ' इति। नापि प्रत्येकं वर्णषु शक्त्याश्रयता, तेषां बहुत्वेन बह्वर्थबोधप्रसङ्गात्। तस्मात् प्रत्येकध्वनिव्यङ्ग्य अनवयवः एको नित्यः कश्चस्कोट-पदाभिधेयः शब्दोऽभ्युपेयः। स च शब्द आत्मतत्त्वमेव, तदेव च प्रत्येकध्वनिरूपरूषितं सत् स्फोट इत्युच्यते। तदुवतं भाष्योद्द्योते= एतच्छास्त्रसाध्यप्रयोगव्यङ्ग्यत्वस्य ध्वनिरुपवैखरीरूपरूषितस्यैव तैर्वाचकत्वस्वीकारेण तस्य चात्यन्तविचारे ब्रह्मातिरेके मानानुप-लम्भेन चित एव बोधकतया तैर्ग्रहात् ' । ध्वनिना यदा तस्य अभिव्यन्जनं तदैवार्थबोधः। अतस्तस्य नित्यत्वेऽपि न सर्वदा अर्थबोधप्रसङ्गः। स्फोटशब्दस्य व्युत्पत्तिविर्मर्शेनाऽपि अयमर्थः प्रत्यतुं शक्यते। तथा हि स्फुटति प्रकाशते प्रमीयते अर्थोऽनेन स स्फोटः। स्फुट्विकसने इत्यस्मात् धातोः करणे घञ् प्रत्ययः। तथा च अर्थविषयकप्रमाजनकत्वं स्फोटत्वमित्चयायाति अन्यञ्च स्फोट्यते ध्वनिना अभिव्यज्यते यः स स्फोटः, इति रीत्या स्फुट् , धातोः कर्मणि घञ् प्रत्ययः तेन ध्वनि व्यङ्गत्त्वं लभ्यते। एवञ्च अर्थविषयकप्रमाजनकत्वे सति ध्वनिव्यङ्ग्यत्वं स्फोटत्वमिति पूर्णोऽर्थो लभ्यते। एतेन स्फोटाख्यशब्दलक्षणं सुष्ठु परिज्ञातं भवति उक्तञ्च भगवता भाष्यकृत- येनोच्चारितेन सास्नालाङ्गुलककुद्खुर-विषाणिनां सम्प्रत्ययो भवति स शब्दः। तत्र उच्चारितेन इत्यस्य प्रकाशितेन इत्यर्थः कृतः प्रदीपकृता श्रीकैयटेन । अत्र लक्षणे सत्यन्तदलानुपादाने चुटचुटादिध्वनिना व्यज्यमाने अप्सरणादि-पदार्थेऽपि स्फोटलक्षणस्य अतिव्याप्तिः स्याद् अतः तदुपादानम्। विशेष्यदलानुपादाने बह्व्यनुमितौ हेतुभूते धूमादौ पदार्थेऽतिव्याप्तिः स्याततस्यापि बह्वरुपार्थविषयिकायाः अनुमितिप्रमाया जनकत्वाद् अतस्तदुपादानम्। यदि तु ध्वनिपदेन वैखरीरूपा वागेव गृह्यते, न तु चुटचुटादिध्वनिः तदा तादृशवैखरीध्वनिज्ञाप्यः एव तद् व्यङ्ग्यः। ज्ञाप्यत्वञ्च ज्ञानजन्यज्ञानविषयत्वम्। एवञ्च वैखरीध्वनिविषयकश्रावणप्रत्यक्षरुपज्ञानजन्यज्ञानविषयत्वम् इति लभ्यते। तच्च आकाशादावपि अस्ति, यतो हि एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति रीत्या वैखरीध्वने श्रावणप्रत्यक्षे जाते सति समवाय-सम्बन्धेन तत्सम्बन्धिन आकाशस्यापि स्मरणसम्भवः स्यादेव। एवञ्च आकाशादावतिव्याप्तिवारणाय सत्यन्तदलस्य अस्ति परमावश्यकता। यदि तु तस्मिनुच्यमानेऽपि तत्रापिप्रसङ्गः सम्भवत्येव यतो हि आकाशादिरपि अर्थः, तद् विषयकस्मृतिरूपप्रमाजनकत्वं वैखरीध्वनो अस्त्येव इत्युच्यते, तन्न सम्यक्तरं प्रतिभाति। स्मृतेः प्रमात्वस्वीकारे तज्जनकसंस्कारस्य प्रमाणत्वप्रसङ्गः स्यात् स च न इष्यते। अर्थविषयकप्रमाजनकत्वमित्यत्रार्थपदेन वृत्ती प्रतिपाद्यस्यैव ग्रहणाच्च, इति रीत्या सर्वं समन्जसं भवितुमर्हति ।

**(2)वृत्याख्यसम्बन्धविमर्शः-** तत्र स्वार्थे वर्तते शब्दः अनया सम्बन्धव्यक्त्या सा सम्बन्धव्यक्तिः वृत्तिरित्युच्यते। उक्तञ्च भगवता भाष्यकृता 'ग्रामशब्दोऽयं बह्वर्थः, अस्त्येव शालासमुदाये वर्तते'। अत्र उद्योतः- 'अत्र सर्वार्थनिरुपितवृत्तीनां वर्तते इति।' एकशब्दबोध्यत्वेनाभेदबोधनाद् एकशक्तिपक्षो भाष्यबोधितः। तत्र वर्तनक्रिया अस्तिक्रियायाः, कर्तु, शालासमुदायादौ ग्रामशब्दस्य वृत्तिरस्ति इत्यर्थः इति । अनेन परिज्ञातयते यत् अस्ति शालासमुदाये वर्तते इति भाष्यवाक्ये वर्तते इत्यस्य वृत्तिः इत्यर्थः कृतः, उद्योतकृता श्रीनागोजिभट्टेन । तत्र प्रकारो न प्रदर्शितः। इत्थं च प्रकारान्वेषणे इदं ज्ञायते यत् प्रकृत्यर्थ एव विवक्षणीयः कर्तृ

रूपस्तप्रत्यार्थो न विवक्षणीयः। अत एव वृतुणात्वर्थो वर्तनं, तच्च वृत्तिः, तस्याश्च अस्तिक्रियाकर्तृत्वम्। एषा वृत्तिरेव शब्दार्थतया सम्बन्धत्वेन अभ्युपेयते। ते च मतान्तरदृष्ट्या शक्तिलक्षणाव्यन्जना इति त्रिविधाः प्रसिद्धाः। तत्र शक्तिलक्षणेत्येवं वृत्तेद्र्वाविध्यं न्यायमीमांसावेदान्तदर्शनेषु यद्यपि तत्र 'सिंहो माणवकः' इत्यादौ तृतीया गौणीवृत्तिरपि स्वीकृता, तथापि तस्या लक्षणान्तर्भूततया न पार्थक्येन अधुना सङ्केतः कृतः। अलङ्कारिकदृष्ट्या तु शक्तिर्लक्षणाव्यञ्जना चेति त्रिविधा वृत्ति सम्बन्धाः तत्र तत्र स्वीकृताः। व्याकरणदर्शने तु लक्षणायाः शक्तिसम्बन्धमध्येऽन्तर्हितत्वात् न पार्थक्येन स्वीकारः। व्यन्जनायास्तु सर्वतोभावेन स्वीकारोऽस्त्येव इति कृत्वा शक्तिव्यञ्जनाभेदाभ्यां द्विविधैव वृत्तिः स्वीकृताऽस्ति।

### (3)वृत्तिस्वरूपम्

**(क.) वृत्तिशब्दस्य व्युत्पत्तिः**-वृत्तिशब्दस्य का व्युत्पत्तिरित्याकाङ्क्षायामुच्यते- (वृत् + क्तिन्) वृद्धातोः करणे वर्तते यया , वर्तते (शब्दोऽर्थे प्रवर्तते) अनया वेति व्युत्पत्तौ, अधिकरणे- वर्तते अस्मिन्निति व्युत्पत्तौ, भावे- वर्तनं वृत्तिरिति व्युत्पत्तौ वा क्तिन् प्रत्यये सति वृत्तिशब्दो निष्पद्यते। केचित्तु- वर्तते असौ वेति व्युत्पाद्य बाहुलकात् कर्तरि क्तिन्निति कथयन्ति, किन्तु तन्नोचितं प्रतिभाति। अकर्तरीत्यनुवृत्तेः प्रकृतसूत्रे ऽपि सत्त्वात्।

एवं विविधव्युत्पत्तिभिर्निष्पन्नस्य वृत्तिशब्दस्य विविधेष्वर्थेषु प्रयोगाः शास्त्रेषूपलभ्यन्ते। यद्यपि अमरकोषहलायुधादिकोशग्रन्थेषु नैकत्र क्वापि सर्वेष्वर्थेषु प्राप्तप्रयोगाणामुद्धरणानि संकलितानि दृश्यन्ते, तथापि केषाञ्चिदर्थानां कोशेषु, केषाञ्चिच्च वेदादौ लौकिकसंस्कृतवाङ्मये चोपलब्धेः संग्रहस्तेषामावश्यक इति मत्त्वा प्रसंगतः सोदाहरणं वृत्तिशब्दस्यार्थविषये किञ्चित् विवेचनं प्रकरणेऽस्मिन्नत्रोपस्थापयिष्यते।

यद्यपि वृत्तिशब्दस्य विविधव्युत्पत्तिदर्शनात् तद्बलाच्च विविधार्थवाचकता तु सिद्धैव, तथापि पारिभाषिकाणामप्यनेकेषां व्युत्पत्तिलभ्यार्थातिरिक्तार्थानां वाचकता समवलोक्यते। अतएव व्युत्पत्तिलभ्यपारिभाषिकयोरुभयोरपि यथोपलब्धोदाहरणानि संक्षेपेणात्र प्रस्तूयन्ते।

**(ख.)वृत्तिशब्दस्य विविधार्थकोदाहरणानि**-द्रुत-मध्यम-विलम्बिताख्यो वृत्तिशब्दः-

ऋग्वेदप्रातिशाख्ये वाचस्तिस्रो वृत्तयो द्रुता, मध्यमा, विलम्बिताख्यारुपा उपदिष्टाः। यथोक्तम्-

**तिस्रो वृत्तयरुपदिशन्ति वाचो।**

**विलम्बितां मध्यमां च द्रुतां च।। इति।**

पुनश्च- विलम्बितायां वृत्तौ प्रातः सवनम्, मध्यमायां वृत्तौ माध्यन्दिनं सवनम्, द्रुतायां वृतौ तृतीयं सवनं भवतीत्यपि कर्मविशेषं वृत्तिभेदात्मकं तत्रैवाहुः- यथा वृत्त्यन्तरे कर्मविशेषमाहुः इति।

**जीविकार्थको वृत्तिशब्दः**-जीविकार्थे वृत्तिशब्दस्य बहुशः प्रयोगः शास्त्रेषु दृश्यते। संक्षेपेण कानिचिदुद्धरणानि प्रस्तूयन्ते। तद्यथा कात्यायनश्रौतसूत्रे-

"ब्राह्मणोऽश्वमेधेऽविद्वान् वृत्तिः स वः" इति। अस्यायमर्थः- यद् अश्वमेधयज्ञे होत्रादिकर्मणि यो हि अविद्वान् ब्रह्मणः, स युष्माकं जीवनोपायः। तदीयं धनधान्यादिकं भवद्भिः संगृहीतव्यमिति भावः।

मनुस्मृतौ-

"**एषोदिता गृहस्थस्य वृत्तिविप्रस्य शाश्वती।** " इति।

शंखस्मृतौ-

**"वृत्त्या शूद्रसमास्तावद् विज्ञेयास्ते विचक्षणैः।**

**यावद् वेदे न जायन्ते द्विधा ज्ञेयास्ततः परम्।।"**

आपस्तम्बधर्मसूत्रे– "वृत्तिं प्राप्य विरमेत् '' इति।
ब्रह्मवैवर्तपुराणेऽपि– वृत्ति (जीविका) हरणे दोषाभिधानप्रसंगेनोक्तम् स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः । इत्यादि।
अष्टाध्याय्यामपि–"जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्
वृत्त्यमत्रावपनाकृत्रिमा–
श्रयणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु '' इत्यस्मिन् सूत्रे वृत्तिशब्दो जीविकावाचक एव भगवता पाणिनिनाऽभिहितः । न्यासादौ अपि दृश्यते।

**शब्दार्थसम्बन्धवाचको वृत्तिशब्दः-**शब्दस्यार्थेन सह कदाचन विलक्षणः सम्बन्धो वरीवर्ति, येनोच्चारितेन तच्छब्देन तस्यार्थस्यैव भानं भवति। यथा घटशब्दस्योच्चारणेन कम्बूग्रीवादिमतो बोधो जायते, न तु प्रवाहस्य, नापि पटादेर्न वा समवायेनोपस्थितस्याकाशादेः। स च सम्बन्धः वृत्तिपदेन व्यपदिश्यते। यथोक्तं निरुक्ते–

**''अथानन्वितेऽर्थे प्रादेशिके विकारेऽर्थोनित्यः परीक्ष्येत केनचिद् वृत्तिसामान्येन ''इति।**

**''सामान्यवाचिकाः शब्दा विशेषे स्थापिताः क्वचित्। पलायने यथा वृत्तिः को नु मयी इतीषते।। ''इति वृहद्देवतायाम्।**

इत्यत्र "को नु मया इतीषये'' इति मन्त्रे "ईषते'' इत्यस्य (गच्छतीति) गमनार्थवा–चत्वेऽपि पलायनरुपोऽर्थो गृह्यते ऋग्वेदे। यद्यप्यस्य परार्थाभिधायकत्वे व्यवहारे व प्रदर्शनमुचितं प्रतिभाति। तथापि शब्दार्थसम्बन्ध एवात्रापि प्राणभूतोऽतोऽत्रोपस्थापित–मिदमुदाहरणम्।
पाणिनीयव्याकरणानुयायिनस्तु शब्दार्थयोः सम्बन्धस्य वैशिष्ट्यं प्रतिपादयन्तः सम्बन्धस्य वृत्तिपदेन क्वचिच्छक्तिपदेन व्यवहारं विहितवन्तः। यथा वार्तिके– "सिद्धे शब्दार्थसम्बन्धे '' इति।
शब्दस्यार्थस्य तयोः सम्बन्धस्य च नित्यता प्रतिपादिता महाभाष्ये। वाक्यपदीये–

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थेभावेन प्रक्रिया जगतो यतः।।**
**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिवज्ञानं सर्वं शब्देन भासते।। इति।**

वैयाकरणभूषणे च दृश्यते। तद्यथा–

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।।**

एवञ्च मञ्जूषादावपि शब्दार्थसम्बन्धवाचको वृत्तिशब्दः दरीदृश्यते। न्यायदर्शने च– गदाधरभट्टाचार्येण प्रतिपादितम्– "संकेतो लक्षणा चार्थे पदवृत्तिः।''

**न्यायसिद्धान्तमुकतावल्याम्-**वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धः सा च पदपदार्थयोः सम्बन्धरूपा वृत्तिः।

**विवरणार्थको वृत्तिशब्दः-**लाट्यायनश्रौतसूत्रे– "ज्योतिष्टोमस्योक्थानामुत्तरे सौत्रमनामैव अतिरात्र उक्थान्त इतराणीति गौतमो वृत्तिग्रहणात् इत्यत्र वृत्तिपदस्य विवरण (व्याख्या) रूपोऽर्थः स्फुटो भवति।
कातन्त्रव्याकरणे– "सूत्रस्यार्थविवरणं वृत्तिः'' इति स्पष्टमेव यशोवर्मणा विवरणार्थकत्वं वृत्तेरिति वर्णितम्।

**चित्तस्यावस्थाविशेषवाचको वृत्तिशब्दः-**"वृत्तिनिरोधात् तत्सिद्धिः ''इति सांख्यसूत्रे वृत्तिपदेन प्रमाणविपर्ययविकल्पनिप्रा–स्मृतयश्चित्तस्यावस्थाविशेषाः गृह्यन्ते।

"योगश्चिततवृत्तिनिरोध: ''इत्यनेन वचनेन चित्तस्यावस्थाविशेषो वृत्तिपदेन सुस्पष्टमेवोद्घोषित:। अत्रापि सांख्योक्ता: प्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपा वृत्तिभेदा: अभ्युपगता: सन्ति।

**आधेयवाचको वृत्तिशब्द:**-"वृत्तेरर्थ: ज्ञानम्'' इति कथनानुसारेण

**सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते।**

**स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ।।** इत्यत्र वृत्तिशब्द: आधेयरूपार्थ:।

**व्यवहारवाचको वृत्तिशब्द:**-"शूश्रूषस्व गुरुन् कुरु प्रियसखीवृत्तिं सपत्नीजने'' इत्याद्यभिज्ञानशाकुन्त-लान्तर्गतवृत्तिशब्द: व्यवहारवाचक:।

मनुस्मृतौ च- "गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्। " इत्यत्र व्यवहारार्थक: वृत्तिशब्द:। अन्यत्रापि व्यवहारार्थक: वृत्तिशब्दस्य प्रयोग: दृश्यते।

**शक्ति-लक्षणा-व्यञ्जना-तात्पर्याख्यारूपो वृत्तिशब्द:**-शाब्दबोधार्थं शब्दानामर्थप्रत्यायनार्थमेवोपयोगित्वात् तत्तदाचार्याणां तत्तच्छास्त्रेषु विविधविचारा: दरीदृश्यन्ते। तत्र केचन शक्त्या , केचन शक्तिलक्षणाभ्यामु-भाभ्याम्, अपरे- शक्तिलक्षणा-व्यञ्जनाभि:, अन्ये तात्पर्याख्ययाऽपि अन्वयबोधम-भ्युपगच्छन्ति। एवं चतस्रो वृत्तय: प्रसिद्धा। तद्यथा- "वृत्त्यपेक्षा चादेशे न विद्यते। इति लाट्यायनश्रौतसूत्रे। तत्र च वृत्तिशब्दस्य संकेतरूपोऽर्थ: निर्दिष्ट:।

शक्तिवादे- "संकेतो लक्षणा चार्थे पदवृत्ति: ।''

साहित्यदर्पणे-

**शक्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणतया मत:।**

**व्यङ्ग्यो व्यञ्जनया ता: स्युस्तिस्र: शब्दस्य शक्तय:।।**

**''तात्पर्याख्यां वृत्तिमाहु: पदार्थान्वयबोधने।।''**

**पाणिनियव्याकरणस्य वाचको वृत्तिशब्द:**-पातञ्जलमहाभाष्ये- 'समर्थ: पदविधि: ''अनेकमन्यपदार्थे 'इत्यनयो: सूत्रयो: व्याख्याने वारद्वयं सूत्रपाठस्य कृते वृत्तिशब्दस्य प्रयोग: समुपलभ्यते।

न्यायमञ्जर्यामपि तथैवोक्तम्-

**वृत्तिसूत्रं तिला माषा: कपद्री कोद्रवौदन:।**

**अजडाय प्रदातव्यं जडीकरणमुत्तमम्।।**

**शास्त्रप्रवृत्तिवाचको वृत्तिशब्द:**-वार्तिके- "वृत्तिसमवायार्थ वर्णानामुपदेश:'' इत्यत्र वृत्तिशब्दस्य शास्त्रप्रवृत्ति-रूपोऽर्थो महर्षिपतञ्जलिव्याख्यानुसारम् अभीप्सित:। यथोक्तं महाभाष्ये-

'का पुनर्वृत्ति: ?शास्त्रप्रवृत्ति:' इति।

एवञ्च विभिन्नेषु अर्थेषु वृत्तिशब्दस्य प्रयोग: शास्त्रे दृश्यते वृत्तिशब्दस्य विभिन्नार्थवाचकत्वं प्रदश्र्य साम्प्रतं वृत्तिस्वरुपमुच्यते।

**वृत्तिस्वरूपविमर्श:-** सा चेयं चित्तस्य विषयाकारपरिणामरूपा वृत्तिरिन्द्रियेण सहैव। अत एव रसनेन्द्रियगतपित्तस्य दोषसम्बन्धेन 'गुड: कटु:' नयनगतपित्तयोगेन च 'शङ्ख: पीत:' इति प्रतीयते। पीतांशे सा भ्रमरुपा, शङ्खांशे तु प्रमारुपा। सर्वं हि ज्ञानं धर्मिण्यभ्रान्तम्, प्रकारांशे तु विपर्यय इति सर्वेरभ्युपगमात्। सेयं वृत्तिविषयावच्छिन्ने पुरुषे प्रतिबिम्बते इति पुरुषस्य विषयाकारेण विद्यमानवृत्तिग्राहकत्वम्। प्रतिबिम्बोऽपि परिणामविशेष एव, न त्वादर्शादाविव प्रतिबिम्ब: उभयोरपि नीरूपत्वादान्तरत्वाञ्च।

इयं च वृत्तिरचेतनाऽपि चिदाभाससम्बन्धेन विषयं प्रकाशयति। पुरुषोऽपि बुद्धितादात्म्याध्यासेन बुद्धेः कर्तृत्वादिधर्मान् "कर्ता, 'भोक्ता' इत्यादि रूपेणाभिधीयते। चिद्रूपपुरुषसम्बन्धेनेयं वृत्तिर्ज्ञानत्वेनोपचर्यते, अयो दहतीतिवत्। स्पष्टं चैतत्सर्वं लघुमन्जूषायां तद्टीकाद्वये च। क्वचन ग्रन्थे वृत्तौ पुरुषस्य प्रतिबिम्बनं लिखितम्, अत्र तु पुरुषे वृत्तिप्रतिबिम्बनमिति कथमिदं सम्भवतीति न वाच्यम्, अन्योऽन्यतादात्म्याध्यासेन उभयपक्षस्यापि समीचीनत्वात्। वस्तुतस्तु अधिष्ठानस्यातिस्वच्छत्वात्, विभुत्वाच्च अधिष्ठाने एवाध्यासो भवितुमर्हति इत्यत्रत्य एव पक्षः समीचीनतरः इति सारांशः।

एवञ्च बाह्यविषयस्थले तत्तदात्म्यापन्नबौद्धविषयस्य, अन्यत्र तु बौद्धस्यैव बुद्धौ समारोपात्मकः परिणामी वृत्तिः, सैव प्रत्यक्षप्रमा, तत्करणमिन्द्रियम्, इन्द्रियस्य विषयेण सह संयोगादिः सन्निकर्षो व्यापारः।

वस्तुतस्तु एतां वृत्तिं द्वारीकृत्य घटादिविषयस्य साक्षिरूपे चेतने प्रतिबिम्बनमेव वृत्तिजन्यं फलम्। एतदेव शाब्दिकमते मुख्या प्रत्यक्ष प्रमा उच्यते। एतदेव पूर्वमीमांसायां प्रकटा इत्युच्यते। अत्र कल्पे एषा वृत्तिरेव प्रमाणम् अविद्यानिवृत्तिरुप-आवरणाज्ञानध्वंस एव व्यापारः । सुव्यक्तमेतत् सांख्यदर्शनेऽपि ।

**इदं ज्ञानं प्रत्यक्षमिति व्यवहारे प्रयोजकविमर्शः-** अन्तःकरणस्य तद् वृत्तेर्विषयाणाञ्च प्रतिबिम्बनाश्रयतया पुरुषः अन्तःकरणा-वच्छिन्नः, वृत्यविच्छिन्नः, विषयावच्छिन्न इति व्यवह्रियते। अन्तः करणावच्छिन्नं चैतन्यमेव प्रमातृचैतन्यम् वृत्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यमित्युच्यते, विषयावच्छिन्नं चैतन्यञ्च विषयचैतन्यमिति चैतन्यत्रितयस्यावच्छेदकमन्तःकरणादित्रयमुपाधिपदेनापि उच्यते। तत्रोक्तचैतन्यत्रितयस्य यदुपाधित्रितयं तस्य एककालिकैकदेशस्थित्या त्रयाणामपि चैतन्यानामेकत्वं ज्ञानगतप्रत्यक्षत्वप्रयोजकम्, न तु वृत्तेरिन्द्रिपजन्यत्वम् अनुमितेरपि प्रत्यक्षत्वप्रसङ्गात् न्यायमते तस्या अपि मनोरूपेन्द्रियजन्यत्वात्। एवं च विषयेण सह चक्षुरादीन्द्रियस्य संयोगः तत्रेन्द्रियप्रणालिकयावदन्तःकरणं प्रणालिकया-ऽन्तःकरणं विषयदेशे गच्छति, बाह्यविषयतादात्म्यापन्नबौद्धविषयाकारा वृत्तिरन्तःकर-णदेश एव इति तत्रैव अन्तःकरणं वृत्तिः, सूक्ष्मो विषयश्चेति त्र्याणामुपाधीनामेककाले एकदेशस्थत्वमिति तत्र चैतन्यत्रयस्यैकत्वेन ज्ञानं प्रत्यक्षमिति व्यवहारो भवति। वेदान्तपरिभाषायामपि प्रमाणचैतन्यविषयचैतन्ययोरभेदो ज्ञानगतप्रत्यक्षत्वे प्रयोजक उक्तः ।

इदञ्च वृत्तिर्जायमाना सती स्वविषयघटादिविषयकमज्ञानं निवर्त्य स्वविषयं प्रकाशयन्ती आत्मानमपि प्रकाशयति, न तु तत्प्रत्यक्षाय वृत्यन्तरं कल्पयते, अनवस्थाप्रसङ्गादिति वृत्तेरपि प्रत्यक्षविषयता ज्ञेया।

**श्रीपतञ्जलिमतेऽपि मनसो विषयाकारता-**यद्यपि महाभाष्ये क्वापि मनसां विषयाकारा वृत्तिः शब्दातो नोक्ता, न च नैयायिकैरपि प्रक्रियेयमुच्यते, तथापि 'अस्मदो द्वयोश्च' इति सूत्रस्य भाष्ये प्रतिपादितस्य उपलब्धिशब्दस्य उपलभ्यतेऽनयेति व्युत्पत्त्या वृत्तिरूपोऽप्यर्थो भवितुमर्हति, एवं च वृत्तेः प्रमाणत्वपक्षः स्वीक्रियते। तथाहि चित्प्रतिबिम्बनरूपा प्रमा लभ्यत एव। 'अपक्रामति तत्तस्माद् दर्शनम्' इति भाष्ये दर्शनशब्दस्य वृत्तिरूपोऽर्थः स्फुटं व्याख्यातोऽपि श्रीनागोजिभट्टैः ।

'अवश्यमत्र कश्चित् स्वकृतान्त आस्थेयः इति स्त्रियामिति सूत्रीयभाष्योक्त्यापि ध्वनितमिदम्' तत्र हि उद्धयोते स्वशास्त्रस्य सांख्यशास्त्रानुसाररित्व-सूचनं भाष्यकारस्येत्युक्तम्। सांख्यशास्त्रे तु मनसो विषयाकारः परिणामी वृत्तिरुपोऽभ्युपगम्यत एव। योगदर्शनेऽपि वृत्तिर्मनः परिणामत्वेन स्वीकृतैव। तथा च 'वृत्तिसारूप्यमितरत्र ' इति सूत्रं सार्थक्यमावहति।

**सूत्रकृन्मते वृत्तिस्वरूपणम्**

**आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।। इति।**

पाणिनीयशिक्षोक्त्या अन्तःकरणस्य परिणामविशेषो वृत्तिरिति सूचितम्। तत्र हि 'आत्माऽन्तःकरणं बुद्ध्या स्ववृत्या समेत्य अर्थान् घटादिविषयान् विवक्षया तान् बोधयितुमिच्छया मनोयुङ्क्ते, संयुनक्ति' इत्यर्थः श्रीनागेशादिसम्मतः। अत्र बुद्धिरन्तःकर-णस्य वृत्तिरिति स्पष्टमेव व्याख्यातम्। सा च वृत्तिः विषयाकारपरिणाम एव भवितुमर्हति, अन्यादृश्या असम्भवात्। अत्रात्मा अन्तःकरणं, तच्च बुद्धितत्वमेव, तस्य विषयाकारा वृत्तिः, पश्चाच्चार्थान् विवक्षया मनो युङ्क्ते इत्यनेन मनसोऽपि तदाकारावृत्तिरित्युक्तप्रायम्। अनेन शिक्षाग्रन्थेन सूत्रकारस्यापि सांख्यशास्त्रानुसारित्वं ध्वनितम्। तन्मते हि बुद्धिमनसोः पार्थक्यात्।

**प्रत्यक्षपरोक्षज्ञानयोः वृत्तिस्वरूपम्**:-वेदान्तादिदर्शने प्रत्यक्षस्थल एव इन्द्रियप्रणाल्या बर्हिगतस्य अन्तःकरणमस्य तत्तदाकोरा वृत्तिर्भवति। अनुमित्यादिपरोक्षस्थले तु वृत्तिर्न भवति, किन्तु वृत्तेरूल्लासमात्रमेव । परन्तु व्याकरणदर्शने शब्दादिस्थलेऽपि वृत्तिः अभ्युपेयते, यतो हि अन्तःकरणस्य विषयाकार परिणामः तद् विषयकमावश्यकम् अज्ञानं निवर्तयति। ततश्च चेतने यत् तद् वृत्युपहितत्वं तत्रैव प्रमा इत्युच्यते, तत्करणत्वाद् वृत्तिः प्रमाणम्। आवरकाज्ञाननिवृत्तौ यत्र वृत्यवच्छिन्नचैतन्यस्य योग्यविषयावच्छिन्नचैतन्यस्य च एककालिकत्वम् एकदेशस्थत्वं तत्र तयोरैक्याध्यासात् प्रत्यक्षत्वम्, न तु विषयेन्द्रियसन्नि-कर्षजन्यत्वमात्रेण ज्ञानस्य प्रत्यक्षत्वम्। अत एव 'तत्त्वमसि' 'दशमस्त्वमसि' इत्यादि-वाक्यजन्यज्ञानस्थलेऽपि आत्मनः एव विषयत्वेन अन्तःकरणवृत्यवच्छिन्नचैतन्यस्य आत्मरूपविषयावच्छिन्नदचैतन्यस्य च शरीररूपैकदेशस्थत्वेन एककालिकत्वेन च प्रत्यक्षत्वव्यवहारः। अनुमितिस्थले अर्थापत्तिस्थले च अन्तःकरणस्य बर्हिविषयेण सह सन्निकर्षाभावेन वृत्यवच्छिन्नचैतन्यविषयावच्छिन्नचैतन्ययोः एकदेशस्थत्वाभावात् न ऐक्याध्यासः, एवञ्च विषयेन्द्रियसन्निकर्षस्थले क्वचिच्छब्दस्थले च विषयाकारवृत्त्यभवनेन प्रत्यक्षं भवत्येव। अन्यत्र न विषयाकारा वृत्तिः इति विशेषः।

**इयं वृत्तिः प्रत्यक्षा भवति न वा?**

वृत्तेः वृत्यन्तरस्वीकारेऽनवस्था प्रसङ्ग इति कृत्वा तस्याः प्रत्यक्षं भवति न वा इति संशयो जागर्ति। अत्रोच्यते- वृत्तेः वृत्यन्तराविषयत्वेऽपि स्वविषयत्वस्यैव अङ्गीकारेण तस्या अपि प्रत्यक्षं भवत्येव। अनुमित्यादिस्थलेऽपि यन्मते परोक्षावृत्तिः स्वीक्रियते तन्मते तस्याः प्रत्यक्षं जायते एव। तत्र वृत्यवाच्छिन्नचैतन्य- वृतिर्न वृतिरूपविषयावच्छिन्न-चैतन्ययोः प्रमातृचैतन्यरूपैकदेशस्थत्वात् पूर्वोक्तमते तत्र वृत्तिर्न भवति तदा तस्याः प्रत्यक्षविषयत्वचर्चाऽपि दूरापास्तैव।

**दण्डी इति प्रत्यक्षे विषयताविश्लेषणम्**:-दण्डी इति प्रत्यक्षे वृत्तिसंयुक्तस्यैव दण्डिनः प्रत्यक्षत्वात् वृत्तिस्थत्वम्। तत्र दण्डाकारणे यः पुरुषत्वसम्बन्धः स एवात्र प्रकारताः, दण्डत्वनिष्ठश्च यः सम्बन्धः सोऽवच्छेदकत्वाख्यप्रकारता। संयोगिनिष्ठः यः पुरुषेण सम्बन्धः सः सांसर्गिक विषयता, पुरुषनिष्ठो यः सम्बन्धः सः सम्बन्धः विशेष्यता। एतासाञ्च प्रकारत्वादिविषयतानां परस्परं अवच्छेद्यावच्छेदकभावः यथा दर्शनान्तरे तथैव व्याकरणदर्शनेऽपि। तथा हि समवायनिष्ठावच्छेदकतानिरूपितावच्छेद्यतावत् दण्डत्वनिष्ठावच्छे-दकतानिरुपिता सतो संयोगनिष्ठावच्छेदकतानिरूपिता च या दण्डत्वनिष्ठाप्रकारता, तादृशप्रकारत्वावच्छिन्ना या समवायिनिष्ठातु निरूप्यनिरूपकभा-वापन्नानां प्रकारता विशेष्यतादीनाम् अवच्छेद्या-वच्छेदकभावो यथा परन्यायेऽपि केनापि सम्बन्धेन विशेषणविशेष्यभावम् आपन्नानां पदार्थानाम् अवच्छेद्यावच्छेदकभावस्तद्वत् ।

**शाब्दिकनये विषयतायाः स्वरूपविमर्शः**:-व्याकरणदर्शने सर्वासु विषयतासु विषयतात्वरूपोऽखण्डो धर्मोऽङ्गीक्रियते। तत्र का नाम विषयता? तस्याश्च किं स्वरुपम्? इति जिज्ञासायामुच्यतेज्ञानस्य विषयेण सह यः सम्बन्धो वर्तते स एव विषयता, सा च ज्ञाननिष्ठाविषयविशिष्टज्ञानस्वरूपा। एवञ्च विषयस्य नाशेऽपि ज्ञानस्य विद्यमानत्वाद् भवति विषयता। यद्यपि ज्ञानस्यापि तृतीय-क्षणवृत्तिध्वंसप्रतियोगित्वाद् विषयाभावे विषयत्वासम्भवात्। तथापि स्वजन्यसरकारद्वारा विषयत्वसत्ता बौद्धव्या। यदि तु विषयतायाः

प्रकारताविशेष्यताभेदेन भिन्नतया घटविशिष्ट बुद्धिं प्रति घटविषयकज्ञानस्य हेतुत्वे अनुगतरूपेण विषयतायाः प्रवेशे न स्यात्, तत्तद विषयतायाः निवेशेन कार्यकारणभावे एकस्याः विषयतायाः निवेशे अन्यविषयताशा-लिज्ञानाद् बोधो न स्यात् इत्युच्यते। तदा सर्वासु विषयतासु एकमेव विषयतात्वमखण्डोपाधिभूतम् अभ्युपेतव्यम्। तथा च विषयतात्वेन रूपेण घटनिष्ठसकल-विषयतायाः निवेशेन अनुगतकार्यकारणभावोऽपि सम्भविष्यति इति शाब्दिकसिद्धान्तः।

**न्यायदर्शने विषयतात्वनिर्वचनम्**-शाब्दिकनये वृत्त्यनुयोगिकचेतनसम्बन्धरूपा विषयता उक्ता। न्यायदर्शने तु अस्याः भिन्नमेव स्वरुपं निर्णीतमस्ति। तदित्थम्तत्तद्विषयविशिष्टज्ञानं विशेष्यतादिरूपम्-यथा-'घटवद् भूतलम्' इत्यत्र भूतलनिष्ठा विशेष्यता भूतलविशिष्टज्ञानरूपा। एवमेव सर्वत्रैव तत्तद् विषयनिष्ठा विषयता तत्तद् विषयविशिष्टज्ञानरूपैव। विषयतायाः केवल-विषयरूपत्वे घटोविषयतावान् इत्याधाराधेयभावो नोपपद्येत्। अभेदस्यापि आधाराधेय-भावनियामकत्वे 'घटो घटवान्' इत्यपि आपद्येत्। अन्यञ्च विषयताया विषयरूपत्वे घटत्वप्रकारकप्रमानिरूपितायाः घटत्वप्रकारकभ्रमनिरूपितायाश्च विषयताया ऐक्यप्रसक्त्या घटत्वप्रकारकप्रभायाः भ्रमत्वं पटत्वप्रकारकभ्रमस्य च प्रमात्वं स्यात्। भूतलम् (घटभूतलयोः संयोगः) इति ज्ञानयोरपि ऐक्यं प्रसज्येत। यद्यपि एवं घटवद् द्वितीयस्थले संयोगस्य संयोगत्वेन भानं, प्रथमस्थले तु मतुपा सम्बन्ध्युल्लेखात् न तेन भानमिति विशेषो वक्तुं शक्यः। तथापि 'घटवद् भूतलं संयोगश्च घटभूतलसंयोगाः, इति ज्ञानयोः वैलक्षण्यं दुरुपपादम्। विषयतायाः ज्ञानरूपत्वे तु घटपटावित्यादिसमूहलम्बनात्मकैकज्ञानविषये घटपटादिरूपनानाविषयनिष्ठविषयतानां एकत्वेन तादृशज्ञानानां घटत्वं पटत्वाद्यवच्छिन्न-घटपटादिनिष्ठविषयताकतया भ्रमत्वापत्तिः, अपरञ्चात्रपक्षे ज्ञानाविषयकालस्यापि ज्ञानविशयत्वापत्तिः, कालनिष्ठतत्सम्बन्धस्यापि तत्स्वरूथनतिरिक्तत्वात्। घटानुयोगिक-घटज्ञानप्रतियोगिकविषयत्वस्य कालानुयोगिकघटज्ञानप्रतियोगिककालिकसम्बन्धस्य च घटज्ञानस्वरुपतया ऐक्यात्। घटज्ञानविषयतावान् कालः इति प्रतीतिः आपद्येत इति विषयत्वं पदार्थान्तरमेव न तु विषयज्ञानान्यतरस्वरूपमिति नव्यनैयायिकसिद्धान्तः।

**उक्तविषये प्राचीननैयायिकमतनिरासः**-प्राचीनतार्किकास्तु विषयता विषयज्ञानोभयस्वरूपा इति सिद्धान्तयन्ति। तत्तु न समीचीनम् घटपटौ इति समूहालम्बनात्मकज्ञानस्य तज्ज्ञानपटो भयात्मकपटत्वाव-च्छिन्नपटनिष्ठाविषयताघटकत्वेन घटत्वावच्छिन्नघटनिष्ठतज्ज्ञानघटोभयात्मकविषय-ताघटकत्वेन च घटनिष्ठा या पटत्वावच्छिन्नातज्ज्ञानरूपा विषयता तन्निरूपकत्वेन भ्रमत्वापत्तेः दुर्वारत्वात्। विशेष्यतादीनां केवलभूतलादिस्वरूपत्वे 'घट्वद् भूतलम्' इति ज्ञानानन्तरं भूतलप्रकारकज्ञानवानहम् इत्यनुव्यवसायोऽपि आपद्येत। अतश्च तत्तद् विषयविशिष्टज्ञानस्वरूपमेव विशेष्यत्वादिकं मन्तव्यम्, तथा सति ज्ञानस्य घटावच्छेदेन प्रकारतारुपत्वम्, भूतलावच्छेदेन च विशेष्यतारूपत्वं मन्तव्यम्। वस्तुतोऽत्र पक्षेऽपि गौरवं प्रप्यक्षतोऽनुभूयत एवेति कृत्वा पदार्थान्तरमेव तद् मन्तव्यम्। तत्र च संसर्गता प्रकारता विशेष्यतात्रितयसाधारणं विषयतात्वमखण्डोपाधिभूतं मन्तव्यम्, लाघवात्। एवञ्च द्वयोः दर्शनयोः विषयतात्वविषये तुल्यत्वमायाति। तेन रुपेण सर्वत्र संसर्गवृत्तिसंसर्गत्वाख्यविषयता भासते, सैव च सम्बन्धसामान्यलक्षणतया स्वीक्रियते शाब्दिकमूर्धन्यैः।

**वैयाकरणसिद्धान्तलघुमञ्जूषायां वृत्तिस्वरुपम्-**

**शाब्दबोधः हेतु वृत्तिः**-तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरुपितवृत्ति-विशिष्टज्ञानं हेतुः। अत एव नागृहीतवृत्तिकस्य शाब्दबोधः। अत एव च 'न हि गुड इत्युक्ते मधुरत्वं प्रकारता गम्यते इति समर्थसूत्रभाष्यं सङ्गच्छते। गुडादिशब्देन गुडत्वजात्यव-च्छिन्नो गुडपदवाच्य इत्येव बोधो जाति प्रकारकः। मधुरत्वं तु 'गुडो मधुर ऐक्षवत्त्वात्' इत्यनुमानरूपमानान्तरगम्यम्।

विशेष्यविशेषणभावव्यत्यासेन गृहीतशक्तिकस्य पुंसो घटपदात् घटत्वविशिष्टघट-बोधवारणाय तद्धर्मावच्छिन्नेति। ज्ञाने वृत्तिवैशिष्ट्यञ्च स्वविषयकोद्बुद्धसंस्कारसामाना-धिकरण्यस्य स्वाश्रयपदविषयकत्वोभय सम्बन्धेन बोध्यम्। अतो नागृहीतवृत्तिकस्य बोधो नापि विस्मृतकस्य नापि तद् वाचकपदम जानतो नापि घटपदादाश्रयत्वेनोपस्थिताकाशस्य जनकतयोपस्थितचैत्रादेश्च बोधः।

संस्कारकल्पिका च वृत्तिस्मृतिरेव शाब्दबुद्धिरेव वेत्यन्यदेतत्।

**कुञ्चिकाटीकायां**-ज्ञाने वृत्तिवैशिष्ट्यं सामानाधिकरण्येन। ज्ञानाधिकरणता च विषयता। तार्किका वृत्ति ज्ञानपदज्ञानयोः पृथक हेतुत्वमिच्छन्ति। अत्र तु लाघवाद्विशिष्टस्यैव हेतुत्वमुक्तम्। तत्रापि वृत्तिविषयकोद्बुद्धसंस्कारसमानाधिकरणवृत्त्याश्रयपदविषयकज्ञानस्य हेतुत्वे गौरव-मतः सामानाधिकरण्यादीनां सम्बन्धकोरौ निवेशः। यस्य हि घटादिपदस्य वृत्तिर्ज्ञाता, तत्र पदे वृत्तिविषयक संस्कारो ज्ञानं चेत्युभयमपि विषयतयास्ति वृत्त्याश्रयपदविषयकं च तज्ज्ञानम्।

घटादिपदव्स्य घटत्वादिविशिष्टे शक्तिरित्यादि वृत्तिविशेष्यक ज्ञानानन्तरं तत्समानाकार एवं संस्कार उत्पद्यते। तादृशसंस्कार विशिष्टं पदज्ञानं शाब्दबोधे हेतुः।

**कलाटीकायां**-तद्व्युत्पत्तिविशिष्टशाब्दबोध तदव्युत्पत्तिर्हेतुः। तद्बीजनकत्वज्ञानं च व्युत्पत्तिः। व्युत्पत्तिवैशिष्टयं च स्वाव्यवहितोत्तररोत्पत्तिकत्वस्वसमानाधिकरण्योभयसम्बन्धनेति न दोष इति वाच्यम्, अनन्तकार्यकारणभावतादवस्थ्यात्। एतेन घटपरादुपस्थिताकाशादेः शाब्दबोधविषयत्व वारणाय शाब्दबोधे वृत्तिग्रहजन्मोपस्थिति हेतुः, वृत्तित्वं शाब्दबोध हेतु पदार्थोपस्थित्यनुकूल शब्दतदर्थसम्बन्ध-त्वमित्यपास्तम्, उक्तयुक्तेः। किञ्च तत्प्रकारक-तद्विशेष्यकतत्संसर्गकबोधे तत्तत्समभिव्याहारज्ञानरूपाकाङ्क्षायास्तत्कारणत्व ज्ञानस्य च कारणतायास्तार्किकादिसम्मततया तपैवाकाशादिवारणसम्भवेन पदार्थोपस्थितिकारणता-शरीरे वृत्तिग्रहजन्मत्वनिवेशस्य विफलत्वात्। किञ्च शक्तिग्रहांशे उद्बुद्धसंस्कारस्य तदुपस्थितिं विनापि बोधानुभवेन पदार्थोपस्थितेः कारणत्वे मानाभावात्। किञ्च पदार्थोपस्थितित्वापेक्षया पदार्थविषयकत्वेनैव लाघवात्कारणत्वौचित्यात् तादृशश्च शक्तिसंस्कार एवेति भावः।

**रत्नप्रभायां**-शाब्दबोधं प्रति वृत्तिप्रयोज्योपस्थितेरन्वयव्यतिरेकाभ्यां कारणत्वमवगम्यते। तत्र वृत्तिः दाहं प्रति वह्न्यादिवन्न स्वरूपेण हेतुः सर्वेषां बोधापत्तेरितिज्ञानविषयीभूताया एव कारणत्वम्। तत्तत्पदनिष्ठां वृत्तिमजानतः पुरुषस्य तत्तत्पदश्रवणेऽपि बोधादर्शनादित्यर्थः।

अयं भावो यत्र पदस्य श्रावणप्रत्यक्षादिकं वृतेश्च स्मरणात्मकं ज्ञानं तत्र विषयतया वृत्तिज्ञानं पदज्ञानञ्च पदरूपे विषये वर्तते, उभयोरपि पदविषयकत्वादिति सामानाधिकरण्यं सुलभम् इति। वेति वा शब्दो हेतुत्वद्योतकतार्थे। तथा च शाब्दबोधरूपकार्येण हेतुना स्मृतिकल्पनं ततश्च संस्कारकल्पनमिति भावः।

**(4)वृत्तिविषये नैयाभिकविचार**:-शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थयोः सम्बन्धत्वं वृत्तित्वमिति। अथवा- "संकेतो लक्षणा चार्थे पदवृत्तिः" इति वचनानुरोधेन संकेतलक्षणान्यतमत्त्वं वृत्तित्वमिति स्वरुपमुद्भावमितुं शक्यते।

प्राचीनाः नैयायिकास्तु- लक्षितलक्षणा वृत्त्यन्तरमिति प्राहुः।

नव्यास्तु-

सा लक्षितलक्षणा जहल्लक्षणैव नातिरिक्ता वृत्तिरिति प्रत्याचरण्युः प्राचाम्मतम्। केचितु- स्वाभाविकी-औपाधिकीति-भेदाभ्यां वृत्तेद्वैविध्यमाहुः।

**अभिहितान्वयवादिनस्तु**-अभिधाया एकैकपदार्थबोधने विरमाद् वाक्यार्थरूपस्य बोधनाय तात्पर्याख्यां वृत्तिमप्यङ्गीकुर्वन्ति। तथोक्तम्- तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने इति।

**(5)वृत्तिविषये वैयाकरणमतविचार:-**प्राञ्च:– शाब्दबोधनिष्ठपदार्थोपस्थितिजनकत्वं वृत्तित्वमाहु:।

नव्यास्तु– जन्यजनकभावकल्पनेन गौरवाच्छब्दानित्यत्वापत्तेश्च शाब्दबोधहेतुशब्दार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वं वृत्तित्वम् इति लक्षणं व्याजहु:।

केचित्तु– "शब्दतदर्थसम्बन्धत्वं वृत्तित्वमित्यूचु: वैयाकरणानां सिद्धान्ते तु वाच्यवाचक–भावा परपर्याया सम्बन्धरूपा शक्तिरैवैका वृत्ति:। मतमेतद् भट्टलोल्लटस्य।

भर्तृहरिणा:–

**अबुधान् प्रतिवृत्तिं च वर्तयन्त: प्रकल्पिताम्।**

**आहु: पदार्थवचने त्यागाभ्युच्यमधर्मताम्।।**

(इत्यनया कारिकया त्यागाभ्युच्यधर्मतां (जहत्स्वार्था–ऽजहत्स्वार्थात्मिकां) वृत्तिं शब्दानित्यत्व वादिनामबुधानां बोधाय कल्पितवान् भाष्यकार इति व्याजहार।)

**नागेशभट्टेन:**-परस्योपसर्जनार्थकस्य राजपुरुष इत्यत्र राजरूपस्य शब्दान्तरेण प्रधानार्थक–पुरुषशब्देनार्थप्रत्यायनं स्वार्थविशेषणत्वेन यद्ग्रहणं सा वृत्ति:।

अथवा– परार्थस्य प्रधानार्थस्य पुरुषस्याप्रधानराजादिपदैर्यत्र स्वार्थविशेष्यत्वेन ग्रहणं सा वृत्तिरित्यन्वाचष्टे।

**ज्ञानेन्द्र सरस्वती**-प्रत्ययान्तर्भाविन पदार्थान्तर्भाविन वा यो विशिष्टोऽर्थ: स पदार्थ: स चाभिधीयते येन तत्परार्थाभिधानमिति व्याचरण्ये।

वासुदेवस्तु– "अभिधानमिति करणे ल्युट्" सामान्ये नपुंसकम्। विग्रहवाक्यावयव–पदार्थेभ्य: परोऽन्यो योऽयं विशिष्टैकार्थस्तत्प्रतिपादिका वृत्तिरिति व्याख्यातवान्।

**केचित्तु- "परशब्दस्तदर्थपरस्तेन युक्तोऽर्थ: परार्थ:।"**

एवञ्च व्युत्पत्या पदार्थान्वितस्वार्थस्यैवोपस्थितिरिति फलितार्थोऽभ्युपेय इत्याहु:।

**अत्रेदमवधेयम्-**

**"अथ ये वृत्तिं वर्तयन्त किं त आहु:।"**

"परार्थाभिधानं वृत्ति:" इति भाष्योक्त्या "पञ्चानां वृत्ति:" इति पूर्वाचार्याणां संज्ञा इहाप्या–श्रियत इति तत्त्वबोधिनीकारोक्त्या च लक्षणमिदं ना पूर्वमित्यनुगम्यत इति। एवमुक्तरूपेण व्याख्याता परार्थाभिधायिका वृत्ति: कृत्तद्धितसमासेकशेषसनाद्यन्त धातुरूपेषु कथं संघटत इति जिज्ञासा समुदेति। तत्समाधानायात्रोच्यते "समर्थ: पदविधि:" इति महर्षि पाणिने: परिभाषासूत्रस्य व्याख्यानादेवोक्त पदार्थाभिधानलक्षणाया कृते: प्रादुर्भावात् पदसम्बन्धिनो ये विधयस्ते कृतद्धितसमासैकशेषसाद्यन्तधातुरूपा वृत्तिपदवाच्या भवन्ति।

**शाब्दिकनये वृत्तिस्वरूपस्य तज्ज्ञानकारणत्वस्य च विमर्श:-** ननु केयं पदनिष्ठा वृत्तिरिति चेत्, उच्यते– शाब्दबोधानुकूलपदार्थज्ञान–जनकज्ञानविषय: पदपदार्थयो: सम्बन्धविशेष एव वृत्ति:। ध्वनितं चेदं वृत्ते: स्वरुपं महाभाष्ये "हलोऽनन्तरा: संयोग:" इति सूत्रे। तत्र हि "ग्रामशब्दोऽयं बह्वर्थोऽस्ति", शालासमुदाये वर्तते, तद्यथा "ग्रामो दग्ध:" इति। तद् य: सारण्यके ससीमके सस्थण्डिलके वर्तते, तमभिसमीक्ष्यैतत्प्रज्यते– अनन्तराविमौ ग्रामाविति इत्युक्तम्। अत्र 'अस्त्येशालासमुदाये वर्तते' इति वाक्ये 'वर्तते' इत्यस्य वृत्तिरित्यर्थ: लडर्थस्याविवक्षि–तत्वात्, वृतुधातो: प्रकृतिभूतस्यैवार्थस्य विवक्षणात्। अन्यथा 'अस्ति' पदोपादानं व्यर्थं स्यात्। एवञ्च अस्ति शालासमुदाये वृत्तिर्ग्रामशब्दस्य इत्यर्थ: सम्पन्नस्तस्य वाक्यस्य। सङ्केतितश्चायमर्थ उद्योतकृताऽपि एवञ्च पदपदार्थयोर्वृत्तिनामक: कश्चन विलक्षण: सम्ब–न्धोऽस्तीत्यागतम् 'तद् य: सारण्यके वर्तते,

तमभिसमीक्ष्य' इति कथनेन पदज्ञानस्य पदनिष्ठवृत्तिज्ञानस्यापि च शाब्दबोधे हेतुता लभ्यते। "एतत् प्रयुज्यते अनन्तराविमौ ग्रामौ'' इत्यनेन अनन्तराविमौ ग्रामाविति शाब्दबोधाकार एव दर्शिता भगवता।

अत्र च पदपदार्थयोः सम्बन्धविशेषत्वमेव वृत्तिलक्षणं बोध्यम्। शाब्दबोधानुकूले-त्यादिर्विषयान्तरस्तु न विशेषणम्, अपि तूपलक्षणं अन्यथा वृत्तित्वग्रहे शाब्दबोध-पदार्थज्ञानयोः कार्यकारणभावग्रहः तद्ग्रहे च निरुक्तपदपदार्थसम्बन्धत्वात्मकवृत्तित्वग्रह इत्यन्योऽन्याश्रयदोषोऽत्र दुर्वारः स्यात्। अर्थे वर्तते शब्दो यया सम्बन्धव्यक्त्या सा वृत्तिः, वृतुधातोः करणे क्तिन्। एवञ्चोक्ते सम्बन्धे वृत्तिपदस्य योगरूढिशक्तिरत्यनुकूला। सङ्केतितं चैतल्लक्षणं श्रीकौण्डभट्टेन वैयाकरणभूषणसारे यद्यपि दोषवत्तया , तथापि मदुक्तरीत्या अस्य निर्दोषत्वमेव।

एवमेव शक्तिव्यञ्जनयोर्द्वयोरेव वृत्त्योरत्र मते सिद्धान्तयिष्यमाणत्वात् शक्तिव्यञ्ज-नान्यतरत्वमपि वृत्तिलक्षणं निर्दुष्टमेव, अन्यतरत्वस्य तद्भिन्नभिन्नत्वरुपत्वेन गुरुशरी-रत्वेऽपि भेदवृत्तिभेदत्वस्याखण्डोपाधित्वस्वीकारेणाननुगमादिदोषवारणात्।

यत्तु लघुमञ्जूषाटीकायां रत्नप्रभायां "वृत्तिपदव्यवहार्यत्वम्, पदपदार्थोभय-निरूपितसम्बन्धत्वं वा वृत्तित्वम्'' इति वृत्तेर्लक्षणद्वयं प्रदर्शितम्। तत्तु न रोचयामहे, तथा हि लक्षणज्ञानात्प्राग् अस्य पदस्यात्रार्थे वृत्तिरित्यादिर्व्यवहारो न सम्भवति, व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनमिति सिद्धान्तात् एवञ्च व्यवहारघटितस्य प्रथमलक्षणस्यासम्भवः,व्यवहारज्ञानाधीनत्वाल्लक्षणज्ञानस्य, लक्षणज्ञानाधीनत्वाच्च व्यव-हारज्ञानस्येति अन्योऽन्याश्रयदोषग्रस्तत्वात्। द्वितीयमपि न सम्भवति, समवायकालिका-दिष्वप्यति प्रसङ्गात्।

यदि तु सकलपदपदार्थसाधारण एकजातीयः सम्बन्धः, समवायस्तु सकल-पदानामाकाश एव, न तु सर्वपदार्थे। कालिकोऽपि पदानामनित्येष्वेवार्थेषु , न तु नित्येष्वित्युच्यते, तदा 'ओमिति ब्रूमहे' मदुक्त एव पर्यवसानात्। यद्यपि साकल्यस्य योगिगम्यत्वेनेदमपि लक्षणं नास्मदादिव्यवहारक्षमम्, तथापि पदपदार्थयोर्विजातीय-सम्बन्धस्य वृत्तित्वमभ्युपेयम्, पदत्वपदार्थ-त्वयोरुपलक्षणविधया प्रवेशः, वैजात्यं च सम्बन्धे शाब्दबोधा-नुकूलपदार्थस्मृत्यनुकूलज्ञानविषयतयेति कथञ्चिद् वक्तुं शक्यते।

एवञ्चैकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयतीति विधया प्रकृते पदस्य श्रावणप्रत्यक्षे सति अर्थनिरूपितवृत्त्याख्यसम्बन्धस्य स्मरणम्, ततश्च सम्बन्धिनोऽर्थस्य स्मरणमिति वृत्तिज्ञानस्य कारणत्वमुपपन्नम्।

**न्यायदर्शने वृत्तिस्वरुपम्, शाब्दिकदृष्ट्या तन्निरासश्च-** शक्तिवादे श्रीगदाधरभट्टाचार्येण "सङ्केतो लक्षणा चार्थे पदवृत्तिः'' इत्युपन्यस्यता शक्तिलक्षणान्यतरत्वं वृत्तित्वमित्येवाभिप्रेतम्, अन्यथा वृत्तेः सामान्य-स्वरूपनिरूपणे तद्विशेषनिरूपणं कथं युज्येत? विशेषजिज्ञासायां सामान्यज्ञानस्य हेतुत्वात्।

तत्रैव टीकायां श्रीहरिनाथभट्टाचार्येण तु- "शाब्दबोधनिरूपिता या स्मृतित्वाव-च्छिन्ना जनकता, तन्निरूपिताव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपिताव-च्छेदकतावत्सांसर्गिकविषयतात्वं वृत्तित्वम्'' इति क्रमेण लक्षणं परिष्कृतम्।

तदेतद् द्वयमपि शाब्दिकेभ्यो न रोचते, लक्षणाया अग्रे खण्डयिष्यमाणत्वेन प्रथमस्य वृत्तित्वज्ञाने एतद्घटककार्यकारणभावज्ञानम्, तज्ज्ञाने चोक्तवृत्तित्वज्ञानमित्यन्योऽन्या-श्रयदोषेण स्मृतेर्व्यापारत्वाभावोपपादकेन नव्यानां सिद्धान्तेन च द्वितीयस्याप्यसम्भवात्।

**निष्कर्षः** - शब्दो हि येन व्यापारेण स्वीयमर्थं बोधयति सा वृतिः।

ज्ञाने हि वृत्तिकृता विशेषता द्वाभ्यां सम्बन्धाभ्यां भवति। प्रथमा तत्र श्रोता हि यत्पदं ज्ञानविषयीकरोति तस्य हि तत्पदविषयकवृत्तिज्ञानसंसकारस्योद्बोधनं वा स्मरणमावश्यकं भवति, यद्धि स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्यसम्बन्धत्वेन मूले गृहीतम्। अत्र वृत्तेः पदस्योभयोरेव ज्ञानस्याधिकरणं

वाश्रयम् एक एव ज्ञातं पदम्। अपरा तु वृत्त्याश्रयपदस्य ज्ञानं तत्पदविषयक शाब्दबोधस्य कृते नितान्तमावश्यकम्, न त्वन्यस्य समानार्थक-स्यापि। एतदेव स्वाश्रयपदविषयकत्वसम्बन्ध इत्युच्यते। उभयत्र स्वपदेन वृत्तिः संसूच्यते। तत्रापि स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्यसम्बन्ध एतदर्थमावश्यको पद्वृत्तिज्ञानविहीनस्य नैव भवति शाब्दबोधः तत्र वृत्तिज्ञानपदज्ञानयोर्नैव समानाधिक-रणसम्भवः। अपरञ्च यत्पदं वृत्तेराश्रयभूतं तदेव पदं पदज्ञानस्यापि विषयः स्यात्। अन्यथा नैव श्रोतुः शाब्दबोधः। सत्यपि वृत्तिज्ञाने तदाश्रयभूतपदस्य ज्ञानाभावेऽपि न भवति शाब्दबोधः। तेन हि शाब्दबोधे स्वाश्रयपदविषयकत्वसम्बन्धोऽपि शाब्दबोधे आवश्यकः। इत्युभयसम्बन्धेन ज्ञाने वृत्तेर्वैशिष्टयमावश्यकम्।

अत्र तु स्पष्ट एव विषयः। न हि कारणं विना कार्यं भवति। अत्र कार्यं शाब्दबोधो येन कारणत्वेन वृत्तिस्मृतिरनुमीयते। सा च कार्यं येन संस्कारः कारणत्वेनानुमीयते। न हि वृत्तिस्मृतिं विना शाब्दबोधो नैव च संस्कारं विना वृत्तिस्मृतिरिति संस्कारसत्त्वेऽनुमानं प्रमाणमिति।

**(6)वृत्तिभेदनिरूणम्-**

सा चेयं वृत्तित्रिधा-शक्तिर्लक्षणा व्यञ्जना चेति लघुमञ्जूषायां नागेशभट्टाः।

वृत्तिभेदाः-




नैयायिकानां नये वृत्तिर्द्विविधा शक्तिलक्षणाभेदेन। आलंकारिकाणाम्मते शक्तिलक्षणातिरिक्तव्यञ्जनाया अपि वृत्तित्वमस्ति। तन्नाङ्गीकुर्वन्ति नैयायिकाः। यतः व्यञ्जनावृत्त्या यादृशार्थविषयकबोधः जायते तादृशबोधस्तु अनुमानेनैव सम्भवाद् व्यञ्जनाया अतिरिक्तवृत्तित्वं नास्ति। तत्सर्वं व्यञ्जनायाः स्वरुपनिरूपणावसरे वक्ष्यते।

**शक्तिलक्षणयोः वृत्तित्वस्थापनम्-** इह खलु जगति समेषां जनानां श्रुतिपथगोचरैरपि सदा सर्वैः पदैः तत्तदर्थ-विषयकसंसर्गावगाहिशाब्दबोधो न जायते किन्तु कैश्चिदेव शाब्दबोधं प्रति वृत्तिप्रयोज्य-पदार्थोपस्थितिरन्वय-व्यतिरेकाभ्यां कारणत्वमवधार्यते। तत्र का नाम वृत्तिरिति आकाङ्क्षा-यामुच्यते भट्टाचार्यैः "संकेतो लक्षणा चार्थे पदवृत्तिः" अर्थात् अर्थनिरुपिता पदनिष्ठा या वृत्तिः सा संकेतरूपा लक्षणारूपा च। तत्र घटादिनिरूपिता घटादिपदनिष्ठा वृत्तिः संकेतरूपा, तीरादिनिरूपिता गंगादिपदनिष्ठा या वृत्तिः सा लक्षणारूपेति। 'शक्तिर्लक्षणा चार्थे पदवृतिः'इत्युक्ते शक्तेरीश्वरसंकेतरुपत्वेन पित्रादिकृतानामाधुनिकसंकेतानां संग्रहो न स्यादिति तदुभय-संग्रहार्थं "संकेतः" इत्युक्तम्।

वृत्तिपदस्य चात्र वृत्तिपदव्यवहार्य एवार्थः, अन्यथाऽर्थनिरूपितत्वमेव वृत्तित्वमिति वृत्तिपदार्थज्ञानार्थमर्थं पदार्थज्ञानापेक्षा, अर्थत्वं च वृत्त्या पदप्रतिपाद्यत्वमित्यर्थपदार्थ-ज्ञानार्थं वृत्तिपदार्थज्ञानापेक्षेति परस्पराश्रयो दोषः स्यात्, वृत्तिपदस्य वृत्तिपदव्यवहार्यत्व-परत्वे च नायं दोषः। तथा च संकेतं लक्षणां चोद्दिश्य वृत्तिपदव्यवहार्यत्वमत्र विधीयते।

**शक्तेः वृत्तित्वस्थापनम्-** ईश्वरसंकेतः शक्तिः संकेतो वा शक्तिरिति नैयायिकाः। तच्चाग्रे वक्ष्यते। अत्र मीमांसकानुयायिनः प्रवदन्ति गगरीत्याद्यपभ्रंशशब्दाद् घटादिपदार्थबोधः शक्तिभ्रमेण भवति भगवदिच्छा च सन्मात्रविषयास्ति अपभ्रंशशब्दनिष्ठं बोधकत्वं तद्वोध्यो घटश्च सदेवेति अपभ्रंशस्यापि बोधकत्वेन रूपेण भगवत्संकेतविषयत्वं प्राप्तं बोधकत्वेन भगवत्संकेतविषयत्वमेव च वाचकत्वं साधुत्वं चेति नैयायिकैरभ्युपगम्यते तथा च अपभ्रंशस्यापि बोधकत्वेनरूपेण भगवत्संकेतविषयत्वाद् वाचकत्वं साधुत्वं च प्राप्नोति न च नैयायिकैरपभ्रंशस्य वाचकत्वं साधुत्वं च प्राप्नोति न च नैयायिकैरपभ्रंशस्य वाचकत्वं साधुत्वं च स्वीक्रियते

इतयाक्षेपः। एवञ्च उक्तयुक्त्या बोधकत्वेन भगवत्संकेतविषयत्वेमेव वाचकत्वं भगवत्संकेतश्च सन्मात्रविषयो गंगादिपदेन तीरादिबोधनमपि च सदेवेति गंगादिपदस्यापि तीरादिबोधकत्वेन भगवत्संकेतविषयत्वं प्राप्तमिति गंगादिपदस्य तीरादिवाचकत्वापत्तिः, न चैतदिष्टमित्यर्थः।

ननु न बोधकत्वेन भगवत्संकेतविषयत्वं वाचकत्वं येनोक्तदोषापत्तिः स्यात् किन्तु बोधकत्वेच्छया "इदं पदमिममर्थं बोधयतु'' इत्याद्याकारकेच्छयेति यावद् भगवदुच्चरित-त्वमेव वाचकत्वम् अपभ्रंशशब्दाश्च नार्थप्रत्यायनेच्छया भगवदुच्चरिता इति अपभ्रंशानां वाचकत्वापत्तिर्नास्तीति चेन्न अस्मदाद्युच्चरितपदेषु अव्याप्तेः। भगवदुच्चरितजातीयत्व-निवेशोऽपि वेदस्थलाक्षणिकेषु शब्देष्वतिव्याप्तेः, सादिदेवदत्तादिपदेऽव्याप्तेश्च। "द्वादशेऽ-हनि पिता नाम कुर्यात्'' इति वेदस्थनामपदस्य देवदत्तादिपदपरत्वेऽपि देवदत्तादिस्वरू-पाणां भगवदनुच्चरितत्वात्। एवमीश्वरसंकेतस्य शक्तित्वे ईश्वरानङ्गीकर्तुमते शाब्दबोधानु-पपत्तिः।

अथ शाब्दबोधोपयोगितायामीश्वरीयत्वमनुपादेयमेव एवं चाधुनिकसंकेतज्ञानादपि शाब्दबोधस्तादृशसंकेतस्य वृत्तित्वं च निर्वहति।

**अभिप्रायस्तु-**शाब्दबोधकारणतायामीश्वरनिवेशो न कर्तव्यस्तथा च "ईश्वरसंकेतः शक्तिः'' इति नोच्यते किन्तु "संकेतः शक्तिः'' इत्युच्यते, संकेतश्चचेच्छा एवं चेश्वरानङ्गीकर्तुमते शक्तिस्वरूपे ईश्वरीत्वनिवेशाभावात् न शाब्दबोधानुपपत्तिः। एवं च तार्किकनये सामान्यतः "संकेतः शक्ति'' इत्युक्ते पाणिन्यादिकृतनदीवृद्धयादिरूपसंकेतस्यापि वृत्तित्वं निर्वहति तादृशाधुनिकसंकेतज्ञानाच्छाब्द-बोधश्चापि निर्वहति, वृत्तित्वं च शाब्दबोधजनकपदार्थो-पस्थितिरूपव्यापारवत्सम्बन्धत्वं तच्चाधुनिकसंकेतेऽप्यस्त्येवेत्यर्थः।

**तात्पर्यस्य वृत्तित्वखण्डनम्-** नन्वाधुनिकसंकेतस्य वृत्तित्वे तात्पयेस्यापि वृत्तित्वप्रसंगः स्यात्, यतः "इदं पदमिममर्थ बोधयतु'' इत्येवं रूपेण यद् बोधकत्वेन पदविषयकत्वं तदेव संकेतत्वं तच्च तात्पर्येऽप्यस्तीति तात्पर्यस्यापि वृत्तित्वं स्यादेव, न चेष्टापतिः, तथा सति तात्पर्यस्य वृत्तित्वे हि लक्षणास्थलेऽपि तात्पर्यस्यैव शाब्दबोधजनकपदार्थोपस्थितिरूपव्यापार-वत्सम्बन्धत्वं स्यादिति लक्षणाया वृत्तित्वोच्छेदप्रसंगः। तात्पर्यज्ञानादेव गंगादिपदात् तीरादिपदार्थोपस्थितिः संभवतीति चेन्न, पदार्थोपस्थितिरुपव्यापारक एव संकेतो वृत्तिरित्युच्यते परार्थोपस्थितिद्वारा शाब्दबोधोपयौगित्वं वृत्तित्व-मिति लब्धं तात्पर्यज्ञानञ्च साक्षादेव शाब्दबोधोपयोगित्वं न तु पदार्थोपस्थितिद्वारा, यतो वृत्त्या पदार्थोपस्थितौ जातायामेव तादृशवृत्त्युपस्थापितपदार्थे प्रकरणादिना वक्तृतात्पर्यावधारणं भवति न तु पदार्थोपस्थितेः पूर्वमपि, तथा च तात्पर्यस्य वृत्तित्वप्रसक्तिनास्तीत्यर्थः।

**लक्षणाया वृत्तित्वस्थापनम्-** यदि लक्षणाया वृत्तित्वं न स्यात्तदा गंगादिपदात् तीरादिपदार्थोपस्थितिरपि न स्यात्तथा च तीरादिपदार्थे गंगादिपदस्य तात्पर्यग्रहोऽपि न स्यात् तथा च शाब्दबोधोऽपि न स्याद् न चैवमस्ति गंगादिपदात् तीरादिविषयकशाब्दबोधस्य सर्वप्रसिद्ध-त्वात् तस्माद् लक्षणाया वृत्तित्वमावश्यकम्, लक्षणाया वृत्तित्वं च लक्षणया गंगादिपदात् तीरादिपदार्थे उपस्थिते तत्र गंगादिपदस्य वक्तृतात्पर्ये गृहीते तीरादिविषयकशाब्दबोधः सम्भवतीत्यर्थः।

सन्दर्भग्रन्थाः


1. बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्त्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणम्प्रोवाच---। (पतञ्जलि-व्याकरणमहाभाष्यम्, 1/1/1 आ.।)
2. वेदव्यासः, ऋक्तन्त्रम्, 1/4, पृ.-3, मेहरचन्द्रलक्ष्मणदाससंस्करणम्, सन् 1933
3. तैत्तिरीयसंहिता - 6/4/
4. पतञ्जलिः, व्याकरणमहाभाष्यम्, 8/4/1 आ.सू. 48, वा. 3
5. पतञ्जलिः, व्याकरणमहाभाष्यम्, आ.1 पृष्ठसं. 92

6. वामनजयादित्यौ, काशिकावृत्तिः, 7/1/99
7. पाणिनिः, अष्टाध्यायी, 7/3/11
8. यास्कः, निरुक्तम्, 1/12
9. ऋक्प्रातिशाख्यम्, 13/61
10. पाणिनिः, अष्टाध्यायी, 6/3/61
11. पाणिनिः, अष्टाध्ययी, 1/1/16
12. पतञ्जलिः, व्याकरणमहाभाष्यम्